# संस्कृत वार्ताः

दिनाङ्क : 15/04/2026 सायम् - 06:20

## आदौ मुख्यवार्ताः

प्रधानमन्त्री नरेन्द्रमोदी कर्नाटकराज्ये मांड्या इति जनपदं निकषा आदिचुनचनगिरी इत्याख्ये मठे 'गुरु-भैरवैक्य-मंदिर' इत्यस्य उद्घाटनम् अकरोत् जनान् च विकसितभारतस्य विचारं साफल्यं प्रति नेतुं पूर्णसमर्पणप्रदानाय समप्रार्थयत् ।

सम्राटचौधरी बिहारराज्यस्य नवीनमुख्यमन्त्रिपदस्य शपथवचनं स्वीकृतवान् । जनता-दल (यूनाइटेड)इति दलस्य वरिष्ठनेतारौ विजय-कुमार-चौधरी, बिजेंद्र-प्रसाद-यादवः च मन्त्रिपदस्य शपथवचनं स्वीकृतवन्तौ ।

पश्चिमबङ्गाल-तमिल्नाडु-राज्ययोः विधानसभा-निर्वाचनाय प्रचारः तीव्रः अभवत्, शीर्षनेतारः उभयोः राज्ययोः मतदातृन् वशीकर्तुं प्रयासरताः सन्ति।

आई. पी. एल. क्रिकेट्-क्रीडायां, अद्य सायङ्काले बेङ्गलूरुनगरे, रायल चैलेन्जर्स बेङ्गलूरु, लखनऊ-सूपर-जायण्ट्स इत्येतं दलं सम्मुखी करिष्यति।

## अथ वार्ताः विस्तरेण

### प्रधानमन्त्री-कर्णाटकयात्रा

प्रधानमन्त्रिणा नरेंद्रमोदिना नागरिकाः सम्प्रार्थिताः यत् ते 'विकसित-भारतम्' इत्येतत् साकारं कर्तुं विकासस्य नवसंख्याकेषु क्षेत्रेषु पूर्णतया सश्रद्धं स्वकीयसमर्पणं सुनिश्चयेयुः ।अद्य कर्नाटकराज्ये मांड्या इति जनपदं निकषा आदिचुनचनगिरी इत्याख्ये मठे 'गुरु-भैरवैक्य-मंदिर' इत्यस्य उद्घाटनावसरे कथयन् प्रधानमन्त्री अवदत् यत् यैः सन्तैः महात्मभिः च समाजाय स्वकीयं जीवनं समर्पितं तेषामपि एतादृशमेव दृष्टिकोणः आसीत् ।

प्रधानमंत्रिणा

नागरिकाः येषु नवसंख्याकेषु क्षेत्रेषु सम्मिल्य कार्यं विधातुं

प्रार्थिताः तेषु जल-संरक्षणं,प्रबन्धनं, 'एक पेड़ मां के नाम' इत्यादयः कार्यक्रमाः

सम्मिलिताः सन्ति ।

प्रधानमन्त्रिणा नागरिकाः स्वदेशीवस्तुभ्यः उद्यमिभ्यः च समर्थनं

प्रदाय  'स्वदेशी-आंदोलन' इत्येतत्

प्रोत्साहितं कर्तुमपि समाहूताः ।सः इदमपि प्रोक्तवान् यत्  भारतीय-नागरिकाः देशस्य विभिनेषु भागेषु यात्रां विधाय पर्यटनाय अपि

प्रोत्साहनं दातुं शक्नुवन्ति । सः रसायनिकपदार्थान् कीटनाशकान् च विहाय

जैविकं प्राकृतिकं च कृषिकार्यं कर्तुम् अपि समबोधयत् ।

बिहार-मुख्यमन्त्रीशपथग्रहणम्

भारतीय-जनता-पार्टीति दलस्य वरिष्ठनेता सम्राटचौधरी

बिहारराज्यस्य नवीनमुख्यमन्त्रिपदस्य शपथवचनं स्वीकृतवान् । पटनानगरस्य लोकभवने  आयोजिते एकस्मिन्

कार्यक्रमे राज्यपालः लेफ्टिनेंट-जनरलपदात् सेवानिवृत्तः सैयद-अता-हसनैनः इत्येषः

तस्मै पदस्य गोपनीयतायाः च शपथवचनानि प्रायच्छत् ।

अवधेयं यत् श्रीचौधरी राज्यस्य चतुर्विंशतितमः

मुख्यमन्त्री अस्ति । सः राज्ये एतत् सर्वोच्चपदं धारयन् भाजपादलस्य प्रथमः नेता

अपि अस्ति । समानावधौ एव , जनता-दल (यूनाइटेड)इति दलस्य वरिष्ठनेतारौ विजय-कुमार-चौधरी, बिजेंद्र-प्रसाद-यादवः च अपि मन्त्रिपदस्य

शपथवचनं स्वीकृतवन्तौ । श्रीचौधरी  श्रीयादवः च

उपमुख्यमंत्रित्वेन कार्यं करिष्यतः ।

विराम

संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते।  सममेव अयं कार्यक्रमः आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय- तन्त्रांशे अपि उपलब्धो भविष्यति।

पश्चिमबङ्गालः-प्रचाराभियानम्

पश्चिमबङ्गालराज्ये प्रचारः द्रुतगत्या प्रचलति। भाजपेति दलस्य वरिष्ठः नेता तथा केन्द्रीय-गृहमन्त्री अमितशाहः अद्य मालदा-नगरात् दार्जिलिङ्ग-नगरस्य लबोङ्ग-क्रीडाङ्गणे दलस्य प्रत्याशिनः समर्थने आभासीय-माध्यमेन जनसभां सम्बोधितवान्। जनसमूहं सम्बोधयन् सः आश्वासितवान् यत् बङ्गाल-प्रदेशे गोरखा-विवादस्य निराकरणं संवैधानिक-रीत्या भविष्यति तथा च राज्ये भाजपेति दलस्य सत्ताग्रहणानन्तरं गोरखा-समुदायस्य जनान् विरुद्ध्य मिथ्या-प्रकरणानि प्रत्याहरष्यन्ति। तृणमूल्-काङ्ग्रेस्-दलस्य प्रमुखा तथा पश्चिमबङ्गस्य मुख्यमन्त्री ममता-बनर्जी इत्येषा त्रयस्त्रिंशोत्तर-चतुर्दश-शततमे वर्षे बङ्गाली-नववर्षस्य अवसरे पश्चिमवङ्गस्य जनान् आभासीय-माध्यमेन सम्बोधितवती। राज्ये सांस्कृतिक-धार्मिक-सौहार्दस्य रक्षणाय अग्रिमे विधानसभानिर्वाचने मतदानं कर्तुं सा जनान् प्रार्थितवती। भाजपेति दलं एस्. आई. आर्. माध्यमेन पश्चिमबङ्गप्रदेशस्य जनानां मतदानस्य अधिकारं न्यूनीकृतवान् इति ममता बनर्जी आरोपितवती।

तमिलनाडु-प्रचाराभियानम्

तमिलनाडुराज्यं

त्रयोविंशतिदिनाङ्के भविष्यमाणाय आगामि विधानसभानिर्वाचनाय सुसज्जं वर्तते ।

प्रधानमन्त्री भाजपादलस्य वरिष्ठनेता च नरेन्द्रमोदी अद्य नगरकोइल इत्यत्र

प्रचाराभियाने रतः अस्ति । ए.आई.ए.डी.एम्.के इत्यस्य सचिवःएडाप्पडि पलनिसामी ,भाजपादलस्य वरिष्ठ नेता

केन्द्रीयमन्त्री च पीयूषगोयलः, भाजपादलस्य राज्यप्रमुखः

नैनार नागेन्द्रन् , पूर्वराज्यप्रमुखः अन्नामलई च

प्रधानमन्त्रिणा सह प्रचाराभियाने रताः सन्ति ।

राष्ट्रपतिः-एम्स्

राष्ट्रपतिः द्रौपदीमुर्मुवर्या अद्य प्रोक्तवती यत् प्रविधिविकासस्य प्रयोगः

ग्रामीणक्षेत्रेषु नागरिकक्षेत्रेषु च स्वास्थ्यसेवानां मध्ये असमानताः दूरीकर्तुं भवितव्यः सहैव अनेन सर्वेभ्यः गुणवत्तापूर्णाः स्वास्थ्यसेवाः समुपलब्धाः

भवेत् । AIIMS-नागपुर सदृशानि संस्थानानि अस्यां दिशि

प्रयासं कुर्वन्ती सन्ति । राष्ट्रपतिमुर्मुवर्या अद्य अखिल-भारतीय-आयुर्विज्ञान-संस्थान

(AIIMS) नागपुर इत्यस्य द्वितीयं दीक्षान्तसमारोहं संबोधयन्ती

आसीत् । स्वास्थ्याधारितसंरचनां सुदृढं कर्तुं विगतेषु दशवर्षेषु केंद्रसर्वकारेण

कृतानि कार्याणि सबलं प्रतिपादयन्ती राष्ट्रपतिः मुर्मुवर्या अकथयत् यत्

सार्ध-त्रिचत्वारिंशत्-कोटिमितानि आयुष्मान्-कार्ड इत्येतानि वितरितानि यैः 'आयुष्मानभारत -

प्रधानमंत्री जन आरोग्य योजना' इत्यभियानान्तर्गतं

सुपात्र-परिवारेभ्यः प्रतिवर्षं पञ्चलक्ष-रुप्यकाणां स्वास्थ्यावरणं सुनिश्चितं

क्रियते ।

उपराष्ट्रपतिः-शासनम्

उपराष्ट्रपतिः सी. पी. राधाकृष्णन् वर्यः अवदत् यत् शासनस्य वास्तविकः उद्देश्यः जनानां सशक्तीकरणम्, तथा च किमपि न अवशिष्टं भवेत् इति सुनिश्चितं करणीयम्। नवदिल्ल्यां भारतीय-लोक-प्रशासन-संस्थानस्य द्विसप्ततितम-संस्थापक-दिवसावसरे अभिसंबोधयन्, असौ उक्तवान् यत् समाजस्य कस्यापि वर्गं, देशस्य कस्यापि क्षेत्रं च विकास-यात्राभ्यः बहिः न करणीयम्। सः अवदत् यत् विकसितभारते कृत्रिम-बुद्धिमत्ता-नीतिः जनानां मध्ये सेतुरूपेण कार्यं करिष्यति, जनसेवा प्रदाने च परिष्कारम् आनेष्यति।

रिजिजुः-महिलारक्षणविधेयकम्

संसदीयकार्यमन्त्री किरेन रिजिजुः आश्वासितवान् यत् महिला-आरक्षण-विधेयके चिन्तायाः विषयः नास्ति, यतः सर्वेषु उपबन्धेषु सावधानेन कार्याणि संपादितानि सन्ति। नवदिल्ल्यां वार्ताहरैः सह वार्तालापं कुर्वन् श्रीरिजिजुः अवदत् यत् प्रत्येकं राज्यं न्याय्येन पर्यालोचितम् अस्ति, यत्र आसनानां सङ्ख्यायां वृद्धेः प्रावधानः अस्ति। सः दृढतया उक्तवान् यत् प्रस्तावितं विधेयकं सन्तुलितम् अस्ति तथा च एतत् प्रत्येकस्य समुदायस्य, क्षेत्रस्य, राज्यस्य च आकांक्षानां परिपालनं करिष्यति।

सी.बी.एस्.ई-दशमीपरिणामः

सेंट्रल-बोर्ड-ऑफ़-सेकेंडरी-एजुकेशन (CBSE) इत्यनेन

षड्विंशत्युत्तर-द्विसहस्रतमाब्दस्य दशमकक्षायाः बोर्डपरीक्षायाः परिणामाः

उद्घुष्टाः । छात्राः स्वकीयान् परिणामपत्रं संस्थानस्य आधिकारिक-अन्तर्जालपटलेषु cbse.gov.in , results.cbse.nic.in तथा cbseresults.nic.in इत्यत्र द्रष्टुं शक्नुवन्ति । आधिकारिकान्तर्जालपटलानि अतिरिच्य

परीक्षापरिणामः DigiLocker , UMANG ऐप इत्यनयो

तन्त्रांशयोरपि द्रष्टुं शक्यते ।

ऋतुविज्ञानविभागः

ऋतु-विज्ञान-विभागेन मध्य-महाराष्ट्रस्य, उत्तर-आन्तरिक-कर्नाटकस्य, रायलसीमायाः, तेलङ्गाना-राज्यस्य च केषुचित् स्थानेषु श्वः यावत् उष्णतरङ्गस्य स्थितेः पूर्वानुमानं प्रकटितम्। आगामि-द्वि-त्रि-दिनेषु तटीय-आन्ध्रप्रदेशे, तटीय-कर्णाटके, पश्चिमबङ्गप्रदेशे, गुजराते, केरलं राज्ये, माहे-प्रदेशे, कोङ्करणे, गोवायां, ओडिशायां, तमिलनाडु-प्रदेशे, पुदुचेरी-प्रदेशे, कारैकल्-प्रदेशे च उष्ण-आर्द्र-ऋतोः प्रबलसंभावना विद्यते इति विभागेन सूचितम्।

आई. पी. एल्

आई. पी. एल. क्रिकेट्-क्रीडायां, अद्य सायङ्काले बेङ्गलूरुनगरे,

रायल चैलेन्जर्स बेङ्गलूरु, लखनऊ-सूपर-जायण्ट्स

इत्येतं दलं सम्मुखी करिष्यति। प्रतियोगिता सायं सार्द्ध सप्तवादने आरभ्यते।

गतरात्रौ चेन्नई-सूपर-किङ्ग्स इत्यनेन दलेन, कोलकाता-नाईट-राईडर्स

इत्येतं दलं द्वात्रिंशत् धवनांकैः पराजितम्।

।। इति वार्ताः ।।